International Journal of Sanskrit Research 2024; 10(5): 76-83

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2024; 10(5): 76-83
© 2024 IJSR
www.anantaajournal.com
Received: 01-07-2024
Accepted: 04-08-2024

**Dr. Prahallad Debta**
M.A.Ph.D, H.O.D. Department of Sanskrit, Barpali College, Barpali, Bargarh, Odisha, India

**Corresponding Author:**
**Dr. Prahallad Debta**
M.A.Ph.D, H.O.D. Department of Sanskrit, Barpali College, Barpali, Bargarh, Odisha, India

# अलङ्कारशास्त्रस्य सम्प्रदायाः

## Dr. Prahallad Debta

**सारांश**
अलङ्कारशास्त्रः काव्यशास्त्रः साहित्यशास्त्र इत्यपि कथितो भवति। अलंकरणमिति अलंकारः यथा शरीरस्य सौन्दर्यमभिवृद्धये विविधालंकाराणामावश्यकता वर्त्तते। तथैव काव्यालंकाराणां तत्वानाञ्च आवश्यकता
काव्यसौन्दर्मभिवृद्धये एवभवति।"साहित्यस्य" शाव्दिकोऽर्थो भवति शव्दार्थयोः विशिष्टः सम्बन्धः ।
अतः उक्तम् "साहितयोर्भावः साहित्यम्" अर्थात् शव्दार्थयोः सहितयोर्भावः साहित्यम्। तयोः सम्बन्धः शाश्वतः। उक्तञ्च :-
नित्यः शव्दार्थसम्बन्धः
साहित्यशास्त्रस्यापरनाम काव्यशास्त्रोऽपि कथ्यते। आचार्येण कुन्तकेन साहित्यस्य वास्तविकार्थं प्रतिपादयन् कथ्यते । शव्दार्थयोः विशिष्टं सम्बन्धं साहित्यं भवति। साहित्यशास्त्रे प्रयुक्तसाहित्यशव्द काव्यार्थे प्रयुज्यते। साहित्यशास्त्रोपरि रचितान् काव्यालंकार-काव्यालंकारसूत्र-काव्यदर्श-काव्यप्रकाशादीन् ग्रन्थान् दृष्ट्वा अनुमीयते यत्, कालान्तरे साहित्यशास्त्रः काव्यशास्त्रः नाम्ना प्रख्यातोऽभवत्। संस्कृतसाहित्ये काव्यशव्देन श्रव्यकाव्यदृश्यकाव्यञ्चेति उभौ गृह्येते। अतः काव्यशास्त्रे श्रव्यदृश्यकाव्ययोः विविधानामङ्गानां विशदवर्णनं विद्यते। साहित्यशास्त्रस्य काव्यशास्त्रस्य च नामान्तरं अलंकारशास्त्रो भवति। व्याकरणदृष्टया अलंकारशव्दस्य अर्थद्वयं वर्त्तते।
१. अलंकारणमलंकारः - भावे घञ्।
२. अलंक्रियतेऽनेनेति अलंकारः - करणे धञ्।
वस्तुतः साहित्यशास्त्रस्य विवेचनेषु विषयेषु अलंकाराणां वर्णनं प्रमुखरुपेण वर्णितत्वात् प्राध्यान्येन "व्यपदेशा भवन्ति", न्यायेन साहित्यशास्त्रः अलंकारशास्त्रोऽपि उच्यते। अलंकार – शास्त्रोपरि विरचितेषु ग्रन्थकारेषु भामहः दण्डिः उद्भट्टः वामनः रुट्रटः मम्मटः प्रतिहारेन्दुराजः, रुच्यकः, भोजः राजशेखरः, जयदेवः, विश्वनायकविराजः प्रभृतयः प्रभुखाः भवन्ति। अलंकारसाहित्ये षडसंप्रदायाः विराजन्ते। यथा :-
१. रससंम्प्रदायः
२. अलंकारसम्प्रदायः
३. रीतिसम्प्रदायः
४. ध्वनिः सम्प्रदायः
५. वक्रोक्तिः सम्प्रदायः
६. औचित्यसम्प्रदायः
यद्यपि काव्यशास्त्रे षडसम्प्रदायाः विराजन्ते। तथापि सर्वेषु सम्प्रदायेषु काव्यस्य सौन्दयमभिवृद्धये एव यत्नः परिलक्षितो भवति।

**कूटशब्दः** साहित्यः, रसः,अलंकारः,रीतिः,ध्वनिः, वक्रोक्तिः, औचित्य

## प्रस्तावना
अलङ्कारशास्त्रः काव्यशास्त्रः साहित्यशास्त्र इत्यपि कथितो भवति। अलंकरणमिति अलंकारः यथा शरीरस्य सौन्दर्यमभिवृद्धये विविधालंकाराणामावश्यकता वर्त्तते। तथैव काव्यालंकाराणां तत्वानाञ्च आवश्यकता काव्यसौन्दर्मभिवृद्धये एव भवति।
"साहित्यस्य" शाव्दिकोऽर्थो भवति शव्दार्थयोः विशिष्टः सम्बन्धः । अतः उक्तम् "साहितयोर्भावः साहित्यम्" अर्थात् शव्दार्थयोः सहितयोर्भावः साहित्यम्। तयोः सम्बन्धः शाश्वतः। उक्तञ्च :-
नित्यः शव्दार्थसम्बन्धः
साहित्ये शव्दार्थयोः पृथकत्वं न क्रियते। अनयोः नित्यं साहचर्यं विद्यते। अनयोः शव्दार्थयोरभावे किञ्चिदपि साहित्यं न सम्भवति। अतः न केवलम् अर्थेन नापि शव्देन साहित्यं सम्भवमपितु उभयोः शव्दार्थयोः साहचर्येण साहित्यं भवति। अतः भामहेन काव्यालंकारे कथ्यतेः -

न स शव्दो नद्वाच्यं न स न्यायो न सा कला।
जायते यत्र काव्याङ्गमहो भारो महान् कविः।।

अतः साहित्यमिदं कविकर्मणः भासकत्वेन साहित्यशास्त्रमपि कथ्यते। साहित्यविद्या पञ्चमीविद्या भवति। यतः साहित्यविधेयं चतसृणां विद्यानां सारो भवति। इति राजशेखरेण काव्यमीमांसायां कथितः। उक्तञ्चः -

पञ्चमी साहित्यविद्योति यायावरीयः
सा हि चतसृभ्यः विद्याभ्यः निष्यन्दा। साहित्यविद्यायाः स्वरुपविषये कथितमस्ति।
साहित्यपाथोनिधिमत्थनोत्थं कर्णामृतं रक्षते हे कवीन्द्राः।
यदस्य दैव्या इव लुण्ठनाय काव्यार्थचौराः प्रगुणीभवति।।

प्रतिहारेन्दुराजेन स्वगुरुं मुकुलः "साहित्यश्रीमुरारेः" इति अभिहितः। अत्र साहित्यस्यार्थः साहित्याशास्त्रो भवति। कविना मुकुलेन उल्लिखितः -
"व्याकरणमीमांसातर्कसाहित्यात्मकेषु चतुर्षु शास्त्रेषूपयोगत्"। आचार्येण कुन्तकेन "वक्रोकिकाव्यजीवितम्" इति ग्रन्थे साहित्यस्य व्याख्यानं निम्नोक्तदिशा क्रियते :-

मार्गानुगुण्यसुभगोः माधुर्यादि गुणोदयः।
अलंकारविन्यासो वक्रतातिशयान्वितः।।
वृत्रौचित्यमनोहारि रसानां परिपोषणम्।
स्पर्धायि विद्यते यत्र यथास्वमुभयोरपि।।
सा काप्यवस्थितिस्तद्विदानन्दस्यानन्दसदृशः।
पदादिवाक् परिस्पन्दसारः साहित्यमुच्यते।।

वस्तुतः शव्दार्थयोः सहितभावे रीतिः गुणः अलंकारवक्रतावृत्तिरसाणामन्तर्भावो भवति। अतः साहित्यशव्दः साहित्यशास्त्रार्थे प्रयुक्तो भवति। नाट्यशास्त्रस्य प्रणेतुः आचार्यभरतादारभ्य पण्डितराजजगन्नाथं यावत् पण्डिताः साहित्यशास्त्रस्य विवेचनं स्वग्रन्थे कुर्वन्ति।
साहित्यशास्त्रस्यापरनाम काव्यशास्त्रोऽपि कथ्यते। आचार्येण कुन्तकेन साहित्यस्य वास्तविकार्थं प्रतिपादयन् कथ्यते । शव्दार्थयोः विशिष्टं सम्बन्धं साहित्यं भवति। साहित्यशास्त्रे प्रयुक्तसाहित्यशव्द काव्यार्थे प्रयुज्यते। साहित्यशास्त्रोपरि रचितान् काव्यालंकार-काव्यालंकारसूत्र-काव्यदर्श-काव्यप्रकाशादीन् ग्रन्थान् दृष्ट्वा अनुमीयते यत्, कालान्तरे साहित्यशास्त्रः काव्यशास्त्रः नाम्ना प्ररव्यातोऽभवत्। संस्कृतसाहित्ये काव्यशव्देन श्रव्यकाव्यदृश्यकाव्यञ्चेति उभौ गृह्येते। अतः काव्यशास्त्रे श्रव्यदृश्यकाव्ययोः विविधानामङ्गानां विशदवर्णनं विद्यते।
साहित्यशास्त्रस्य काव्यशास्त्रस्य च नामान्तरं अलंकारशास्त्रो भवति। व्याकरणदृष्टया अलंकारशव्दस्य अर्थद्वयं वर्त्तते।
१. अलंकारणमलंकारः - भावे घञ्।
२. अलंक्रियतेऽनेनेति अलंकारः - करणे धञ्।

वस्तुतः साहित्यशास्त्रस्य विवेचनेषु विषयेषु अलंकाराणां वर्णनं प्रमुखरुपेण वर्णितत्वात् प्राध्यान्येन "व्यपदेशा भवन्ति", न्यायेन साहित्यशास्त्रः अलंकारशास्त्रोऽपि उच्यते। अलंकार – शास्त्रोपरि विरचितेषु ग्रन्थकारेषु भामहः दण्डिः उद्भट्टः वामनः रुट्रटः मम्मटः प्रतिहारेन्दुराजः, रुच्यकः, भोजः राजशेखरः, जयदेवः, विश्वनायकविराजः प्रभृतयः प्रभुखाः भवन्ति। अलंकारसाहित्ये षडसंप्रदायाः विराजन्ते। यथा :-
१. रससंम्प्रदायः
२. अलंकारसम्प्रदायः
३. रीतिसम्प्रदायः
४. ध्वनिसम्प्रदायः
५. वक्रोक्तिसम्प्रदायः
६. औचित्यसम्प्रदायः

यद्यपि काव्यशास्त्रे षडसम्प्रदायाः विराजन्ते। तथापि सर्वेषु सम्प्रदायेषु काव्यस्य सौन्दयमभिवृद्धये एव यत्नः परिलक्षितो भवति।

**अलङ्कारशास्त्रस्य सम्प्रदायाः**
अलङ्कारशास्त्रे बहवः आलाकारिकाः स्वस्वमतं सिद्धान्तञ्च आलोचितवन्तः। भरतः, भामहः, दण्डी, वामनः आतन्दवर्धनः प्रभृतयः प्रवृद्धाः आलङ्कारिकाः स्व-स्व ग्रन्थे कविकर्मणः उत्पत्तिं, स्वरुपमुत्कर्षं प्रयोजनादितत्त्वानि आलोचितवन्तः। परन्तु प्रत्येकस्य मते किमपि वैशिष्टयं स्वातन्त्र्यञ्च दरिदृश्यते। प्रत्येकेन आलंकारिकेन विशिष्टमतवादः प्रस्थानं वा संस्थापितम्। परवर्त्तिनिकाले सर्वे ग्रन्थकाराः न्यूनाधिकपरिमाणेन एतेषां मतानि च आलोचितवन्तः। एतेषां मतानां सरलिकरणं कृतवन्तः।

**अलङ्कारशास्त्रे प्रमुखरुपेण षड्सम्प्रदायाः सन्ति। ते यथा**

| | सम्प्रदायाः | प्रमुखाचार्याः |
|---|---|---|
| १. | रससम्प्रदायः | भरतमुनिः |
| २. | अलङ्कारसम्प्रदायः | भामहः रुद्रटः |
| ३. | ध्वनिसम्प्रदायः | आनन्दवर्धनः, अभिनवगुप्तः |
| ४. | रीतिसम्प्रदायः | दण्डी, वामनः |
| ५. | वक्रोक्तिसम्प्रदाय; | कुल्तकः |
| ६. | औचित्यसम्प्रदायः | क्षेमेन्द्रः |

**रस सम्प्रदायः**
रस संप्रदायस्य प्रतिष्ठापकः भरतमुनिः भवति। नाट्य शास्त्रस्य षष्ठसप्तमाध्याययोः रसभावादिविषयं मुनिना भरतेन सम्यगुपस्थापतिम्। यद्यपि नाट्शास्त्रः मुख्यतः दृश्यकाव्यालोचनात्मको भवति; तथापि दृश्यश्रव्यकाव्ययोः उभयसामान्यानि वहुतत्त्वानि भरतमुनिना उपदिष्टानि। गुणालंकाररितयः यद्यपि भरतेन वर्णिताः। परन्तु बहिरङ्गत्वेन प्रदर्शिताः। तेन नाट्यशास्त्रे रसस्य प्राधान्यं स्वीकृतम्। रस एव काव्यस्य उत्सस्वरुपः। अत उक्तम् -

न हि रसादृते कश्चिदर्थः। (न. २७३)
रसस्योत्पत्तिविषये भरतमुनिना स्पष्टीकृत्य रससूत्रस्य व्याख्यानं कृतम्। तद्यथा :-
"विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः।"

विभावानुभावव्यभिचारिभावानां संयोगात् रसनिष्पत्तिर्भवति। कारणानि विभावाः कार्याणि, अनुभावाः, सहकार्याणि कारणानि व्यभिचारिभावा इति रसज्ञैः कथ्यन्ते। विभावादिसंज्ञा च विभावनादिव्यापारयोगात् वासनारुपतया अतिसूक्ष्मरुपेणावस्थितान् रत्यादीन् स्थायिभावान् विभावयन्ति आस्वादयोग्यतां नयन्तीति विभावाः।
विभावः द्विविधो भवति। आलम्वनविभावः उद्दीपनविभावश्चेति। यमालम्व्य आश्रित्यं वा अस्माकंचित्ते कस्यचिद् भावस्य उद्रेको भवति; स आलम्बनविभावः। यथा - दुष्यन्तः, रामादयः। अपरस्तु उद्दीपनविभावःयः तस्या उद्रिरिक्ताचित्तवृत्तेः परिपोषणे साहार्यं करोति सः उद्दीपनविभावः। यथा- वसन्तागमः, चन्द्रोदयः, नृत्यादयः, रत्यादीन् स्थायिभावान् अनुभावयन्ति अनुभवविषयीकुर्बन्ति इति अनुभावाः। व्यभिचारिभावास्तु अस्माकं चित्तस्य अस्थायिभावसमूहः। विशेषणाभितः रत्यादीन स्थायिन्ः शरीरे सञ्चारयन्ति अभिरञ्जयन्तीति वा व्यभिचारिणः। अत्र भरतमुनिः मानवस्य चित्तवृत्तिसमुह द्विधा विभाजयन्ति; एकस्तु स्थायिभावः अपरस्तु व्यभिचारिभावः। एतेः विभावाद्यैः अविछिन्नप्रवाहस्य चित्तवृत्तिविशेषस्य स्थिायिभावस्य संयोगात् सामाजिकचित्ते रसस्य उद्रेको भवति। स्थायिभावसमूह एव विभावानुभाव

व्यभिचारिसंयोगात् काव्यरसे नाट्येरसे वा परिणमति। भरतस्य मते स्थायिभावाः अष्टविधाः रसोऽपि तदनुसारं अष्टविधाः भवन्ति भवन्ति। यथाः-

शृङ्गारहास्यकरुणशैद्रवीरभयानकाः।
वीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः।।
रतिहासश्चशोकस्व क्रोधोत्साहौ भयं तथा।
जुगुप्साविस्मयश्चेति स्थायिभावाः प्रकीर्त्तिताः।।

नाट्यरसाः अष्टौ शृङ्गारः, हास्य, करुणः रौद्रः, वीरः भयानकः विभत्सोऽदभुतश्च। यथाक्रमं तेषां स्थायिभावः रतिः, हासः, शोकः, क्रोधः, उत्साहः, भयं जुगुप्साविस्मयश्च। मम्मटेन शान्तरसं पृथग्रसरुपेणाङ्गी क्रियते। अस्य स्थायिभावः शमो भवति। अभिनवगुप्तेन अभिनवभारत्यामुक्तम् - "अथ शान्तो नाम शमस्थायिभावात्मको मोक्षप्रवर्त्तकः," भरतस्य मते व्यभिचारिभावाः त्रयत्रिंशत्संख्यकाः। निर्वेदः, ग्लानिं शङ्का असूया इत्यादयः। एतदतिरिक्ताः अष्टौ सात्त्विकभावाः स्तम्भस्वेदादयः भरतेन स्वीकृताः। यथाः -

स्तम्भस्वेदोऽथरोमाञ्चः स्वरभङ्गश्च बेपथुः।
वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विकाः मताः।।

"विभावानुभावव्याभिचारिभावसंयोगात् रसनिपात्तिः"। इति भरतस्य रससूत्रस्य चतुष्टयं व्याख्यानं कृतं दृश्यते। भरतनाट्यशास्त्रस्य अभिनवभारतीटीकायामभिनवगुप्तेन भट्टलोल्लट-श्रीशङ्कुकभट्टानायकानां मतानि संम्यगालोच्य स्वमतमुपन्यस्तम्। अभिनवगुप्तस्य मतम् अभिव्यक्तिवाद इति प्रसिद्धः। अतः ज्ञायते भट्टलोल्लटस्य उत्पत्तिवादः, श्रीशङ्कुकस्य अनुमितिवादः, भट्टनायकस्य भुक्तिवादः, अभिनवगुप्तस्य च अभिव्यक्तिवादः भवति। एतेषां मतवादीनां मतानि सम्यगालोच्यताम्।

**भट्टलोल्लटस्य उत्पत्तिवादः**

बिभावेन उत्पाद्योत्पादकरुपात्, अनुभावेन गम्यगमकभावरुपात् रत्यादेः स्थायिनः रसरुपत्वेन उत्पत्तिर्भवति। तथा हि ललतादिभिः आलम्बनविभावैः स्थायिरत्यादिको जानितोऽह्णुदितो भवति। उपवनचन्द्रजन्यादिभिः उद्दीपनविभावैः सा स्थायिभावः उद्दीपितो भवति। पुनश्च कटाक्षभुजाक्षेपदिभिः अनुभावैः प्रतीतियोग्यो भवति। तथा उत्कण्ठादिभिः व्यभिचारिभिः एव परिपोषितो भवति। साक्षात्सम्बन्धेन रामादौ अनुकार्ये रसत्वेन पर्यवेशितो भवति। ततः अनुकर्त्तरि नटे रामादिरुपे अनुसन्धानवलाद् आरोप्यमाणः स एव एसः सहृदयानां चमत्काराधायायको भवति। तत्रानुभावे रामोऽयं प्रथमं तावत् रामादिगतसीतादि विषयोको रत्यादिरेव रसः काव्यपात्रलिङ्गद्वारेणैव अनुमीयते। ततः कमनीयाभिनयनिपुणो राम अनुकर्त्तरि नटे सदृश्यज्ञानात् तस्यारोपो भवति। ततः रामोऽयं सीताविषयक रतिमान् इति ज्ञानमेव सामाजिकानां लोकोत्तरह्लादजनकत्वे बीजम्। यथा असत्यपि सर्पे सर्पतया अवलोकिते रज्जौ भितिरुदेति तथा सीतानुरागविषयिणी रामरतिः यद्यपि नटे अविद्यमानाः तथापि नटस्य नटनैपुण्येन तस्मिन् नटे स्थिता इव प्रतीयते सहृदयैः। अतः तादृशः प्रतीयमानरतिः चमत्कारमर्पयन्तो रसपदवीमधिरोहन्ति।

भट्टलोल्लटस्य मतमिदं नादृतं सर्वैः। अनुकार्ये रामादौ रसनिष्पत्या सामाजिकै तान्निष्पत्याभावात् न चमत्कारं सम्पादयन्ति। यदि कथ्यते तर्हि रामादीनामनुकर्त्तरि नटे रामगतरसस्य आरोप एव सामाजिकानां चमत्कारं सम्पादयति। न एतत् वास्तवम्। यतो हि आनन्दो न आरोप्यमाणो भवति। किन्तु स एव वस्तुतः विद्यमानमेव स्वात्मानं प्रकाशयतीति ब्रुमः। सामाजिके रसोत्पत्तिः भट्टलोल्लरमतानुसारं सर्वथा असम्भव। रसस्तावत अलौकिकः चमत्कारो काव्यानाट्यश्रवणदर्शनजन्यश्चेति सर्ववादिसम्मतः।

**श्रीशङ्कुकस्य अनुमितिवादः**

भरतस्य रससूत्रस्य व्याख्यानं श्रीशङ्कुकेन न्यायपरकं कृतम्। अतः अस्य मतं अनुमितिवादरुपेण ख्यातः। अनुकर्त्तृगतो रामादिविषयकरतिभावः सामाजिकैरनुमीयते। अतः रसस्यानुमितिर्भवति। अतः विभावानुभावव्यभिचारिसंयोगात् अनुमेयानुमापकसम्बन्धात् रसस्यानुमिनिरिति सूत्रस्य व्याख्यानं कर्त्तुमुचितम्। प्रथमे सामाजिकानां मनसि चित्रतुरगन्यायेन नटे रामोऽयमिति बुद्धिजयिते ततः कृतगुरुशिक्षाभ्यासात् "सेयं ममाङ्गेषु सुधारसः" इत्यदि काव्यपरामर्शश्च आलम्बनोद्दीपन विभावादिभिःव्यक्तः तदनुगुणरोमाञ्चादेरनुभावस्य आविर्भावेन उत्कण्ठादेः व्यभिचारिभावस्य च प्रकटनेन नटे तस्मिन् अविद्यमानमपि विभावादित्रयं लिङ्गत्वेन स्वीक्रियते। ततः तैरेवाकृतित्वेन गृहीतैः स्थायीरत्यादिः नटे अनुमीयते। अनुमानस्याकारन्तु रामोऽयं सीताविषयकरतिमान्। स चायमनुमितिः चर्वणा प्रतितिकारिणी। अतस्तथा विषयीक्रियमाणाः स्थायिभाव रस इत्युच्यते। चर्वणा हि सामाजिकानाम्। तेषु एव रसः, स च वासनया आस्वाद्यते अनुमीयते वा अतः रतेनुमितिरेव रसनिष्पत्तिः।

ननु साक्षात्कार एव चमत्काराधायकः नानुमितिः इति सम्यक्, परन्तु वस्तुसौन्दर्यवलात् रसरुपत्वेन अनुमीयमाना रतिः इतरानुमिति विलक्षणा एव। अरुचिकरमेतत् शङ्कुकमतम्। रामाद्यभावे तद्रत्यादेरपि अभावेन असतः सत्वेन कल्पना विभादीनपि तथात्वेन गोचरीकरणात्। अपि च सामाजिकानां नटे अनुमितिविरहेऽपि आस्वादोदयात् रसं साक्षात्कारमिति अनुव्यवसायः भवति न तु अनुमिनमीति। किञ्च अभिनयसौन्दर्यसम्पादने व्यस्ततायां तस्मिन् नटे कृतः रसस्य आविर्भावः ?

**भट्टनायकस्य भुक्तिवादः**

भट्टनायकस्य मतः भुक्तिवादः इति प्रसिद्धः। अस्य मतानुसारं न ताटस्थ्येन नात्मगतत्वेन रसः प्रतीयते नोत्पद्यते, नाभिव्यज्यते, अपि तु काव्ये नाट्ये चाभिघातो द्वितीयेन विभावादिसाधारणीकरणनामभावकत्व व्यापारेण भाव्यमान स्थायिसत्वोद्रेकप्रकाशानन्दमयसम्बिद विश्रान्तिः। सतत्त्वेन भोगेन भुज्यते इति भट्टनायकः। न ताटस्थ्येन नात्मगतत्वेन इत्यनेन भट्टनायकेन श्रीशङ्कुकस्य अनुमितिवादः भट्टलोल्लटस्य उत्पत्तिवादः न स्वीकृतः। अपि तु भोज्यभोजक सम्बन्धेन रसस्य स्थापनं कृतम्। शब्दस्य अभिव्यापारवत् काव्यनाट्ययोः तद्विलक्षणं भावकत्वं भोजकत्वनामकं व्यापारद्वयमतिरिक्तमस्ति। काव्यार्थवोधोत्तरमेव भावकत्व व्यापारेण विभावादिरुपसीतादयो रामसम्बन्धिनो रतिश्च सीतात्वरामत्वसम्बन्धशं परिहाय सामान्यतः कामिनीत्व रतित्वादिना एव उपस्थाप्यते। अन्ते भोजकत्व व्यापारेण तु उक्तरित्या साधारणकृतविभावादि सहकृतेन सा रतिः सहृदयैः भुज्यते आस्वाद्यते। अतः भट्टनायकस्य मते भरतकृतरसनिष्पत्तिः सूत्रार्थः-

"विभावदिभिः संयोगात् भोज्यभोजक सम्बन्धात् रसस्य निष्पात्तिर्भुक्तिरिति।"

भट्टनायकस्य भोजकत्वभावकत्वव्यापारेण भुक्तिवादः अपि न स्वीकृतः। यतः रसः सत्त्वेद्रेकस्वरुपमयो भवति। अतः भट्टनायकस्य मतं न स्वीकृतम्।

**अभिनवगुप्तस्य अभिव्यक्तिवादः**

भरतमुनेः रससूत्रस्योपरि अभिनवगुप्तेन अभिव्यक्तिवादः प्रतिष्ठापितः। स्थायिभावानां विभादिभिः सह व्यङ्ग्वव्यञ्चकभावरुपात् सम्बन्धात् रसस्य निष्पत्तिरभिव्यक्तिरिति तेन कथ्यते।काव्यनाटकयोः प्रमदादिभिः आलम्बनकारणैः उद्यानचन्द्रोद्यादिभिः उद्दीपनकारणैः, कटाक्षभुजाक्षेपादिभिरनुभावैः चिन्ताऽऽलस्यप्रभुतिभिः सञ्चारिभावैः रत्यादेः स्थायिभावस्य रसतामेति। ते अलौकिकविभावादयः व्यञ्जनाख्यव्यापारेण सहृदयानां चेतसि साधारणी क्रियन्ते। ततः वासनात्मतया स्थितः स स्थायिभावः व्यञ्जनाव्यापारस्य महिम्ना वैद्यान्तरस्पर्शशून्यः अखण्डः अलौकिकः आस्वाद्यमानो रसो भवति। स एव रस विभावादिकालमात्रस्थायित्वेन अनित्यचर्वणाः पानकरसन्यायेन आस्वाद्यमानः पुर इव परिस्फुरन् सर्वाङ्गमिवव्याप्नुवत् विगलितवेद्यान्तरः व्रह्मस्वादसहोदरत्वेन आत्मानं प्रकाशयति, लोकोत्तरानन्दं जनयति। रतिकारणादीनामनुभवात् अनुमितां रतिः संस्काररुपेण सामाजिकानां हृदयम् अधितिष्ठति। ततः

व्यक्तिविशेषसम्बन्धरतिः कारणविभावादिप्रतिपादकयोः काव्यनाटकयोः व्यञ्जनाख्यव्यापारेण साधारणी क्रियते। साधारणीक्रियमाणेन विभावादिना सहृदयाहृदयावस्थिता सा रतिः व्यञ्जनया एव सामाजिकहृदयेषु रसरुपतया परिणमन्ते। स्थायिनां विभावादिभिः सह व्यङ्ग्यव्यञ्जकभावस्वीकारे रसस्य व्यङ्ग्यर्थं स्फुटमेव। अतः रसनिष्पत्तौ विभावादीनां संयोगः नितान्तमावश्यकम्। फलतः विभावादीनां सम्यक् वर्णनं अधः उपस्थाप्यति।
विभावः - वासनात्मतयातिसूक्ष्मरुपेण अवस्थितान् रत्यादीन् विभावयन्ति आस्वादयोग्यतां नयन्तीति विभावाः। यद्युक्तम् -:

वहबोऽर्थाः विभाव्यन्ते वागङ्गाभिनयाश्रयाः।
अनेन यस्मात्तेनायं विभाव इति सञ्ज्ञितः।।

अनुभावः - कार्याणि भुजाक्षेपकटाक्षकाकुक्तिप्रभृतिनि अनुभावाः। यथाः - नाट्यशास्त्रे : -

वागङ्गसत्त्वाभिनयैः यस्मादर्थो विभाव्यते।
वागङ्गोपाङ्गसंयुक्तस्त्यनुभाव इति स्मृतः।।

व्यभिचारिभावः -
उत्कण्ठादयः स्थायिभावस्य पोषकः, तेषां सञ्चारिभावः व्यभिचारीति व्यपदेश। यथाः -

विशेषादाभिमुख्येन चरन्तो व्यभिचारिणः।
स्थायिन्युन्मग्ननिर्मग्ना कल्लोला इव वारिधौ।।

भरतपरवर्त्तिनः आलङ्कारिकाः रसमङ्गीकुर्वन्ति। आनन्दवर्धनाभिनवगुप्तमम्मटविश्वनाथप्रभृतयः व्यञ्जनावादिनोऽलङ्कारिकाः रसं काव्यस्य सारभूतं तत्त्वमिति अङ्गीकुर्वन्ति। अन्ये वादिनः यद्यपि भिन्नवादं स्वीकुर्वन्ति। परन्तु रसस्य आत्मरुपप्रसङ्गे सर्वेषां एकमत्यं अतः अलङ्कारशास्त्रे रसस्य प्राधान्यं चिरभास्वरं प्रतिभाति।

**अलङ्कारसम्प्रदायः**
भूषणार्थे अलङ्कृतिरितिपदं प्रयुर्वितं भवति। न केवलं शरीरस्य भूषणमलंकृतिरित्युच्यते, परन्तु वैदिककालादेव शव्दार्थयोरथवा वाक्यवाक्यार्थयोः भुषणत्वेन अस्यार्थः सिध्दयति। ऋग्वेदस्य सप्तममण्डले ऊनत्रिंशतम सूक्तस्य तृतीयमन्त्रे उक्तम् :-

"का ते अस्त्यलंकृतिः सूक्तै नूनं ते मधवन दाशेम।"

मन्त्रेऽस्मिन् अलंकृतिरितिपदं शव्दार्थयोः भूषणत्वेन व्यवहृतः, परन्तु अत्र उपमालंकारोऽपि सूच्यते। ख्रीष्टतो द्वितीयशतकेऽपि रुद्रदाम्नः शिलालेखे अलंकारयुक्तं गद्यपद्यमयं साहित्यं अवलोक्यते। भरतनाट्यशास्त्रस्य सप्तदशाध्याये काव्यस्योपादानरुपेण षट्त्रिंशत् लक्षणानि कथितानि। परवर्त्तिभिरालंकारिकैः एतानि लक्षणानि गृहितानि। परन्तु केचित् दण्ड्यादयः प्राचीनालंकारिका एतेषु केवलं हेतुः लेशञ्च द्वावपि अलंकाररुपेण स्वीकृतौ। भरतेन प्रथमं लक्षणं भूषणं इति उक्तम् तेन लक्षणञ्चोक्तम् :-

अलंकारैर्गुणैश्चैव बहुभिः समलङ्कृतम्।
भूषणैरिव चित्तार्थैस्तद्भूषणमिति स्मृतम्।। (ना. शा. १७/६)

काव्यस्य षट्त्रिंशत्लक्षणेषु भूषणमिदमन्यतमम्। तस्मिन् भूषणे अलङ्कारः गुणाश्च अन्तर्भुक्ताः। आचार्येण वामनेन अलङ्कारस्य द्वैविध्यं स्वीकृतम्। (१) भुषणत्वेन, (२) सौन्दर्यत्वेन च।

उक्तञ्च तेन :-

काव्यं ग्राह्यम् अलङ्कारात्। सौन्दर्यमलंङ्कारः।

प्रथमे भरतेन नाट्यशास्त्रस्य सप्तदशाध्याये चत्वारः अलङ्काराः उल्लिखिताः। उपमा, रुपकं, दीपकं यमकञ्चेति। यत्र त्रयोऽर्थालंकारा एकश्च शव्दालंकारो भवति। परन्तु आलङ्कारिकेन भामहेन त्रयः शव्दालङ्काराः द्वात्रिंशदर्थालङ्कारश्च निर्दिष्टः। भामहेन काव्यालंकारः इति ग्रन्थे अलङ्कारस्य महत्वं सौन्दर्यञ्च उल्लिखितम् :-

"रुपकादिलङ्कारस्तस्यन्यैवहुधोदितः।
न कान्तमपि निर्भूषं विभाति वनिताननम्।।" (का. द. १/२३)

अलङ्कारप्रस्थाने भामहः, उद्भटः, दण्डी, रुद्रटः प्रतिहारेन्दुराजश्च प्रमुखाः आचार्याः भवन्ति। अलङ्कारवादिनः यद्यपि अलङ्कारस्य प्राधान्यं स्वीकृतम्। परन्तु तैः रसस्य सत्तां अस्वीकृतं न कृतम्। उद्भट्टेन स्बग्रन्थस्य चतुर्थपरिच्छेदे रसवदलङ्कारप्रसङ्गे उक्तम् :-

रसवद्दर्शितस्पष्टे शृङ्गारादिरसोदयम्।
स्बशव्दस्थायिसञ्चारि विभावादिस्तदास्पदम्।।

दण्डिना रसमदूर्जोस्विनो उल्लेखः कृतः। उक्तञ्च तेन :-

मधुरं रसवद्वाचि वस्तुन्यपि रसस्थितिः।
येन माद्यन्ति धीमन्तो मधुमेव मधुव्रताः।।का.द.१/५१

काव्यप्रसङ्गे दण्डिना रसस्य सतां स्बीकृत्य अष्टरसाः अष्टस्थायिभावाश्च स्वीकृताः। यथाः -

"इहत्वष्टरसायत्ता रसवता स्मृतागिराम्।
प्राक् प्रीतिर्दर्शिता सेयं रतिः शृङ्गारतां गताः।।"

अलङ्कारसम्प्रदायिनां समक्षं काव्ये अलङ्कारस्य प्राधान्यमवभासितम्। रसस्तु अलङ्कारान् प्रति गौणरुपेण उपस्थापितः। अतः तैरपि आलङ्कारिकैः कुत्रचिदलङ्कारेषु रसः अन्तर्भावितं, कुत्रचित्पुनः अलङ्कारस्य प्राधान्यं विधाय रसस्य गौणत्वं प्रदर्शितम्। तस्मात् तैः रसवदलङ्कारः ते स्बतन्त्रतया रसवदिति अलङ्कारमामनन्ति। भामहेन दण्डिना च गुणालङ्कारयोः मध्ये प्रायो कश्चित् विशेषः न परिलक्षितः। दण्डिना व्यापकदृष्ट्या गुणाः अलङ्काररुपेण परिगणिताः उक्तञ्च :-

"काव्यशोभाकारान् धर्मानलंकारं प्रचक्षते।
कश्चिन्मार्ग विभागार्थमुक्तः प्रागप्यालंक्रियाः।।"

दण्डिना नाटकीयपञ्चसन्धीनां चतुष्षष्ठी अङ्गानि, वृत्तिनां षोड़शाङ्गानि, भरतोक्तषणत्रिंशत्लक्षणानि अलंकाररुपेण विवेच्यन्ते।

यच्च सन्ध्यङ्गवृच्यङ्गलक्षणाद्यागमान्तरे.
व्यावर्णितिमिदं चेष्टमलंकारतयैव न।।

रुच्यकस्य मते भामहादयः प्राचीनालंकारिकाः अलाकारव्यतिरिक्तस्य अन्यकस्यापि प्राधान्यं काव्ये न सहन्ते स्म। इति आधारिकृत्य एकावल्यां तरलटीकायां मल्लीनाथेन उक्तम् :-

अभाव एव ध्वनिरिति भामह प्रभृतयः मन्यन्ते।

अतः भामहस्तु ध्वन्यभाववादीति वक्तुं शक्यते। परन्तु काणे महोदयानां मते यद्यपि एतैरालंकारिकैः स्पष्टतः ध्वनिः गुणीभुतव्यङ्ग्यश्चेति शब्देन नोल्लिखतिः तथापि प्रतीयमानार्थं उल्लिखन्ति ते। तथाहि अप्रस्तुतप्रशंसासमासोक्ति। क्षेपाद्यलङ्कारलक्षणेषु गुणीभुतव्यङ्ग्यरुपेण प्रवीयमातार्थम् अन्तर्भवति। भामहेनोक्तम् :-

यत्रोक्ते गम्यतेऽन्योर्थस्तत्समान विशेषणः।
सा समासोक्तिरुदिष्ट संक्षिप्तार्थ तया यथा।।

भामहदण्डयादिभिः ध्वन्यादीनां वर्णनं यद्यपि न कृतम् परन्तु काव्ये सर्वव्यापाकोपादानरुपेण वक्रोक्तेरथवा अतिशयोक्तेः प्रधान्यं तैस्तैः स्वीकृतमेव। उक्तञ्च भामहेन :-

इत्येवमादिरुदिता गुणातिशययोगतः।
सर्वैवातिशयोक्तिस्तु तर्कयेतां यथागमम्।।
सैषा सर्वत्रवक्रोक्तिरनयार्थो विभाव्यते।
यत्नोऽस्यां कविना कार्यः कोऽलंकारोऽनयाविना।।

भामहस्य मतेन प्रत्येकोऽलङ्कार एव वक्रोक्तिसमुद्भुतः। तस्य मते वक्रोक्तिः अतिशयोक्तिः तुल्यरुपः। यस्मिन्नलंकारे वक्रोक्तेर्वा अतिशयोक्ते र्लेशोऽपि सत्ता नास्ति स न अलाकारपदवाच्यः। तस्मात् कारणात् हेतुः सूक्ष्मो लेशश्च भामहस्य मते नैव अलङ्काराः वक्रोक्तिरभावात्। रुद्रतेन भावाख्योऽङ्कार एव लक्षितः। यत्र बस्तु-व्यङ्ग्यरुपेण तिष्ठति तत्रापि तेन अलंकार एव काव्यस्य प्रधानतया व्यबहृतः।
भामहादारभ्य भोजराजं यावत् प्रायशः शब्दालङ्कारार्थालाकाराः संभूयं एकशताधिकसंख्यकोः भवन्ति। अलङ्काराः काव्यस्य शोभाधायकाः भवन्ति। रसस्योत्कर्षकाः अपि भवन्ति। ध्वनिकारेण आनन्दवर्धनेन ध्वनिकाव्ये अलङ्कारं रसोपकारकत्वेन वर्णितः। काव्ये मुख्यभूतस्य धर्माः गुणाः शव्दर्थाश्रितास्त्वलङ्काराः शव्दार्थयोश्चमत्कारमादधतः परोक्षरुपेण रसं स्वीकुर्बन्ति। अतः उक्तम् :-

तमर्थमवलम्वन्ते येऽङ्गीनं ते गुणाः श्मृताः।
अङ्गाश्रितास्त्वलङ्काराः मन्तव्याः कटकादिवत्।। ध्वन्या.२/८

मम्मटेनापि उक्तम् :-

ये रसस्याागिनो धर्माः शौर्यादय इवात्मनः।
उत्कर्षहेतवस्ते स्युरचलस्थितयो गुणा।।
उपकुर्वन्ति तं सन्त येऽङ्गद्वारेण धातुचित्।
हारादिवदलङ्कारास्तेनुऽप्रासोपमादयः।। (का.प्र. /८-२)

**रीतिसम्प्रदायः**

आचार्यवामनः रीतिसम्प्रदायस्य प्रतिष्ठाता भवति। तेन रीति काव्यस्य आत्मा रुपेण स्वीकृता। "रीतिरात्मा काव्यस्य" इति। पदानां विशिष्टरचना रितिरित्युच्यते। पदानां वैशिष्ट्यं गुणानां कारणात् समुत्पद्यते; गुणानामभावात् न पदानां चारुत्वस्फुरणं भवति। भरतमुनिः सर्वप्रथमः गुणान् वर्णयति। भरतेन नाट्यशास्त्रे काव्यार्थगुणाः दशप्रकाराः वर्णिताः। यथाः - श्लेषः, प्रसादः, समता, समाधि, माधुर्यं, ओजः, सुकुमारता, अर्थव्यक्ति, औदार्यं कान्तिश्च। रुद्रदामन् गिरिनारशिलालेखे १५० रव्रीष्टव्दे माधुर्यं कान्तिः उदारता च स्पष्टतः काव्यगुणा उल्लिख्यन्ते। भरतोक्ताः गुणाः दण्डिना स्वीकृताः। परन्तु दण्डिनागुणाः शब्दगता अर्थगता वा नोल्लिखिताः। एते दशागुणाः वैदर्भी रितेः प्राययूतां इति तेन कथ्यते। गौडीमार्गे तु एतेषां गुणानां कतिपये विपर्ययो भवति। अर्थव्यक्तिः, उदारता, समाधिः गुणः वैदर्भी गौड़ी मार्गे च सन्ति। परन्तु वैदर्भिरीतौ अपरे सप्तगुणास्तिष्ठन्ति। गौड़ीरितौ एतेषां विपर्य्यय दृश्यते।
आचार्येण वामनेन उल्लिखिताः दशगुणाः स्वीकृताः। परन्तु एतेषां व्याक्यानां नूतनतया कृतम्। तस्य मते गुणास्तु द्विविधःशव्दगुणाः अर्थगुणाश्चेति। माधुर्यगुणः शव्दगतो भवति। तस्य लक्षणं पृथक् पदत्वं भवति, अर्थात् वाक्ये पदानि पृथकतया तिष्टन्ति। दीर्घसमासयुक्तं पदं न प्रयुज्य पृथक् पृथक पदानां प्रयोगो भवति। अतः अर्थगतः माधुर्यगुणस्य लक्षणं भवति उक्ति वैचित्रयं माधुर्यम्। यत्र अर्थस्य उत्कर्षं प्रदर्शयितुं विचित्रभङ्गया अर्थस्य वर्णनञ्च क्रियते; तत्र अर्थगतं माधुर्यं भवति। यथा -

रसवदमृतं कः सन्देहो मधुन्यपि नान्यथा।
मधुरमधिकं चूतस्यापि प्रसन्नरसं फलम्।
सकृदपि पुनर्मध्यस्थः सन् रसान्तरविद्जनो।
वदतु यदिह्रन्यत् स्वादुस्यात् प्रियादशनोत्यतात्।।

परवर्त्तिनिकाले वामनोक्ताः विंशतिगुणाः आलङ्कारिकैः न स्वीक्रियन्ते। भरतोक्ताः दशगुणाः न स्वीकृत्य प्रथमे भामहेन माधुर्यमोजःप्रसाद इति त्रयो गुणा प्रतिष्ठिताः। अतः अस्य मतस्याधारेण मम्मट, हेमचन्द्र, विश्वनाथकविराजादयः काव्ये गुणत्रयं स्वीकुर्वन्ति। अन्ये गुणाः एतेषु त्रिषु गुणेषु अन्तर्भवन्ति। अतः वामनस्य विंशतिगुणाः तैर्नस्वीकृताः। परन्तु भोजराजः वामनपद्धतिमनुसृत्य चतुर्विंशतिगुणान् उल्लिखन्ति।
प्राचीनालङ्कारिकाः रीतिं मार्गं इति वदन्ति। वैदर्भीमार्गः काव्यस्य रमणीयमार्गः। गौड़ीयमार्गस्तु निन्द्यते। परन्तु भामहमते बैदर्भीमार्ग गौड़ीमार्ग वा न प्रशंस्यते वा न निन्द्यते।
दण्डिना वैदर्भीमार्गः गौड़ीयमार्गञ्च स्वीकृतौ। तेन प्रतिपादिताः दश गुणाः वैदर्भीमार्गे सन्ति। गौड़ीमार्गे तु कतिपयगुणान् विहाय अन्येषां गुणानां विपर्य्ययो भवति इति तेन प्रतिपादितम्। दण्डिमते वैदर्भिमार्गः कविसमीपे आदर्शस्वरुप, अनुसरणीयश्चा गौड़ीमार्गस्तु अस्पृहरणीयः। रीतेः निर्देशः गुणानामाधारेण अनेन स्वीकृतः। वामनात् प्राक् रीतिविषयः एवं विधः आलोचितः। आचार्यवामनस्य मते रीतिः काव्यस्यात्मा। तेन तिस्त्रः रीतयः स्वीकृता। वैदर्भी, गौडी, पाञ्चाली। वैदर्भी रितौ तु ओजोगुणाः कान्तिगुणाश्च विद्यन्ते। पाञ्चाली रितौ माधुर्यं सौकुमार्यञ्च वर्त्तते।
राजशेखरः कर्पूरमञ्जरी ग्रन्थे तिसृणां रीतिनाम् उल्लेखं करोति। वैदर्भी मागधी पाञ्चलीति। आचार्येण रुद्रटेन लाटीया रिति संयोजिता। फलतः रीतिसंख्या चतस्त्रः वर्णिताः। भोजदेवः अवन्ति, मागधी, लाटी, वैदर्भी, गौड़ी, पाञ्चलीति षड़रितिः स्वीकरोति। परन्तु वामनेन उद्भाविताः तिस्त्रः रीतयः सम्प्रति काव्ये प्रचलन्ति। यदि काव्ये गुणाः न सन्ति; परन्तु अलङ्काराः सन्ति। तैरलंकारैः काव्यस्य शोभा न भवति। यौवनहीनशरीरं यदि अलंकारेण मण्डितं स्यात्, न तत् चमत्कारितां प्रकाशयेत्। यौवनस्य सुषमया एव कामिनीशरीरं कमनीयं भवति। तथैव काव्ये गुणानां सत्तायां रमणीयता भवति।
अलंकारसम्प्रदाये तथा चान्ये सम्प्रदाये रसः काव्यस्य वहिरंगसाधनमिति स्वीक्रियते। परन्तु वामनः रसं काव्यस्य अन्तरङ्गधर्मं इति परिगणयति। कान्तिरुपेण रसः काव्ये स्फुरति। कान्तिलक्षणं वामनेन विहितम दीप्तरसत्वं कान्तिः दीप्ताः रसाः शृङ्गारादयो यत्र दीप्तरसः। तस्य भावोदीप्तरसत्वं।
शृङ्गारादयो रसाः उद्दीप्ता भूत्वा यत्र प्रकटिताः भवन्ति। स एव कान्तिगुणाः। अतः गुणमध्ये रसम् अन्तर्भावयति वामनः।
परवर्त्तिनः आलङ्कारिकाः आनन्दवर्धनम्मटादयः यद्यपि रीतिरात्माकाव्यस्य इति वामनस्य मतं न स्वीकुर्वन्ति, परन्तु काव्ये रीतिसत्तां मानयन्ति। ध्वनिवादिनः आलङ्कारिकाः रितिं ध्वनिना समं प्रदर्शयन्ति। आचार्येण कुन्तकेन नूतनतया रीतिविचारं कृतम्। साम्प्रतिकरीतीनां नामकरणं भौगलिकाधार सापेक्ष्य भवति। आचार्यः कुन्तकः रितिं मार्गः इति स्वीकरोति। त्रयो मार्गः तेन सूच्यते।

१. सुकुमारमार्गः (वैदर्भीरितिः)
२. विचित्रमार्गः (गौड़ीय रीतिः)
३. मध्यममार्गः (पञ्चाली रीतिः)

अतः भामहादारभ्य कुन्तकं यावत् रीतिः काव्यस्य महत्त्वपूर्णं तत्त्वरुपेण स्वीकृतमस्ति।

**ध्वनिसम्प्रदायः**

अलङ्कारशास्त्रे ध्वनिसम्प्रदायः वरिष्ठः गरिष्ठश्च। अस्मिन् सम्प्रदाये आचार्याः ध्वनितत्त्वमुन्मुच्य काव्यस्य अन्तस्तत्वं व्याख्यातवन्तः। साहित्यशास्त्रे येषां काव्यतत्त्वानां उद्भवः विकाशश्च अभूत्। तेषां सर्वेषां तत्त्वानां सामञ्जस्य ध्वनितत्त्वेन सह विधाय आलोचकाः महत्त्वपूर्णं कार्यं सम्पादयन्ति। ध्वनिशिध्दान्तस्य स्थापना आनन्दवर्धनेन कृता, यः ख्रीष्टीय नवमशतक आविर्भूतोऽसीत्। ततः प्रभृति अद्यावधि ध्वनीसिध्दान्तः सहस्त्रवर्षाधिककालं यावत् प्रचलति। ये ध्वनिसिद्धान्तस्य विरोधिनः आचार्याः प्रतिहारेन्दुराजः, कुन्तकः भट्टनायकः, महिमभट्टः प्रभृतयं आसन्, तेषां मतखण्डनं प्रवलयुक्तिभिः कृतम् ध्वनिवादश्च संस्थापितः। ध्वनिसिद्धन्तोऽनेन प्रकारेण विरोधीनां युक्तिज्ञानादुत्तीर्णो स्वयं समुद्भासते।

कोऽयं ध्वनिरिति जिज्ञासायां इदमुत्तरं भवति यत् वाच्यार्थात् द्वितीयं रमणीयमर्थान्तरं प्रकाशते; वाच्यार्थापेक्षयो स अधिकचमत्कारपूर्णो भवति, तदेव ध्वनिकाव्यं कथ्यते। मम्मटेन उक्तम् - "इदमुत्तममतिशायिनि व्यङ्ग्ये वाच्याद् ध्वनिर्वुधैः कथितः।" (का.प्र.)। अर्थस्तावद् द्विविधः - वाच्यः प्रतीयमानार्थञ्च। यच्यार्थे अलङ्कारादीनां समावेशो भवति। प्रतीयमानार्थे ध्वनेः स्फुरणं भवति। प्रतीयमानार्थस्य उपलब्धिः काव्ये प्रत्यकेन कर्त्तुं शक्यते। यथा-

अङ्गनानां हस्तपादद्यवयवव्यतिरिक्तं लावण्यं स्फुरति तथा काव्ये वाच्यतिरिक्त चमत्कार जनकः प्रतीयमानार्थः उल्लसति इति सहृदयानामनुभवः। अतोक्तमानन्दवर्धनेन :-

प्रतीयमानं पुनरन्यदेव
वस्त्वस्ति वाणीषु महाकवीनाम्।
यत्रत्प्रसिध्दावयवातिरिक्त
विभाति लावण्यमिवांगनासु।। (.... १/४)

आनन्दवर्धनेन ध्वनितत्त्वं स्वतन्त्रं प्रदर्शितम् वाल्मीकिः कालिदासादीनां कृतिषु आनन्दवर्धनः ध्वनिसत्तां ध्वन्यालोकग्रन्थे सम्यक् प्रदर्शयन्ति। अस्मात् एकशतकात् अनन्तरं अभिनवगुप्तः आविर्भूतोऽभवत्। ध्वेन्यालोकग्रन्थोपरि स लोचनटीकां विरचितवान्, ध्वनितत्त्वंञ्च दृढरुपेण स्थापितवान्। मम्मटविश्वनाथादीनां ध्वनिविरोधिनां मतं खण्डयित्वा ध्वनिसिद्धान्तं प्रतिपादितः। वैयाकरणानां स्फोटसिध्दान्तं गृहीत्वा ध्वनितत्त्वं ध्वनिवादिभिरालंकारिकैः व्यवस्थापितम्।व्याकरणशास्त्रे ध्वनिः अभिव्यञ्जक इति रुपेण प्रयुक्तः । परन्तु साहित्यशास्त्रे ध्वनिशव्दस्य प्रयोगः अभिव्यञ्जके शव्दे अर्थे च बवति।

ध्वनिः सत्तां तस्य च स्वरुपं निश्चित्य व्यङ्ग्यव्यञ्जकदृष्टया ध्वनिकारेण भेदाः प्रदर्शिताः। व्यङ्ग्यार्थदृष्टया ध्वनिः द्विविधः -

१. अविवक्षितवाच्यध्वनिः।
२. विविक्षितान्यपरवाच्यध्वनिः।

अविवक्षितवाच्यध्वनौ लक्षणामूलकव्यङ्ग्यस्य स्थितिः अभिधामूलकव्यङ्ग्यस्थितिश्च विद्यते। लक्षणामूलकव्यङ्ग्यः पुनः द्विविधो भवति। (१) अजहत्स्वार्थलक्षणा (२) जहत्स्वार्थलक्षणा।

यत्र अजहतस्वार्थलक्षणा तत्र अर्थान्तरसंक्मितवाच्ध्वनिः। यत्र जहतस्वार्थलक्षेणा तत्र अत्यन्ततिरस्कृतवाच्यध्वनिः भवति।

विविक्षितान्यपरवाच्यध्वनिः द्विविधः। (१) असंलक्ष्यक्रमव्यंग्यध्वनिः (२) संलक्ष्यक्रमव्यंग्यध्वनिश्च। असंलक्ष्यक्रमव्यंग्यध्वनौ रसध्वनिः, भावध्वनिः, रसभावयोः,आभासौ भावशक्ति, भावशवलता, भावसम्पदादयो गृह्यन्ते। अयं रसादिध्वनिः ध्वनेरात्मा अस्ति।

अस्य सम्वन्धेन शव्दालङ्कारः अर्थालङ्कारश्च ध्वनेः विषयो भवति। ध्वनिकाव्ये रसादीनां प्राधान्यं वर्त्तते। यत्र रसभावादीनां अप्राधान्यं दृश्यते, तत्र रसवदलंकारो भवति। काव्ये गुणाः रसमाश्रयन्ति। रसेन सह गुणस्य नित्यसम्बन्धोऽस्ति। श्रृङ्गारकरुणादिकोमलरसान्वितकाव्येषु माधुर्यगुणास्तिष्ठति। रौद्रवीररसान्वितकाव्येषु ओज गुणः वर्त्तते। प्रसादगुणः सर्वेषु रसेषु सम्बन्धितो भवति। रसस्तु चित्तवृत्तिस्वरुपः। करुणः विप्रलम्भश्रृङ्गार, श्रृङ्गारसेषु चित्तवृत्तिः तिष्ठति। रौद्र-वीर-वीभत्स रसेषु दीप्तिः वर्त्तते। स्वच्छता विस्तृतिः वा सर्वेषु रसेषु तिष्ठति। चित्तस्य वृत्तिः, दिप्तिः, विस्तृतिदृष्ट्या क्रमशः माधुर्यम् ओजः, प्रसादश्च गुणाः स्वीक्रियन्ते। रसादि ध्वनिरुप असंलक्ष्यक्रमः यद्यपि स्वगतः परगतमिश्रण भेदेन अनन्तप्रकारो भवितुमर्हति। असंलक्ष्यक्रमव्यग्यध्वनिः द्विविधः।

(१) शव्दशक्तिमूलः।
(२) अर्थशक्तिमूलश्च।

शव्दशक्तिमूलध्वनौ केवलमलंकारध्वनिः प्रतीयते। अयं श्लेषात् नितान्तं सिद्धः। अर्थशक्तिमूलध्वनिश्च आक्षिप्तवस्तुनः आक्षिप्तालंकारदृष्टया द्विविधः। अर्थशक्तिमूलः त्रिविधः।

१. कविप्रौढोक्तिः
२. स्वतसम्भवो कविनिबद्धः
३. वक्तृप्रौढोक्तिः

अतः अर्थशक्तिमूलध्वनिः द्वादशप्रकारः। ध्वनिदृष्ट्या काव्यं द्विविधं ध्वनिकाव्यं गुणीभुतव्यंग्यञ्च। व्यंग्यस्य प्राधान्ये वाच्यस्य अप्राधान्ये ध्वनिकाव्यम्। व्यग्यस्य अप्राधान्ये वाच्यस्य प्राधान्ये गुणीभुतव्यंग्यम्। ध्वनिकारेण आनन्दवर्धमेन ध्वनेः भेदत्रयं स्वीकृतम्। यथा -

१. अलंकारध्वनिः।
२. वस्तुध्वनिः।

रसध्वनौ न केवलं नवरसाः; परन्तु रसाभासाः, भावभासाः, भावोदय, भावशवलता, भावसौन्दर्यादयश्च वर्त्तन्ते। वस्तुध्वनौ केवलं वस्तु व्यज्यते। अलङ्कारध्वनौ अलंकारव्यज्यते। एतेषु ध्वनिषु रसध्वनिः श्रेष्ठः भवति। ध्वनिः काव्यस्य आत्मा इति सामान्यं कथनं वस्तुतः रस एव काव्यस्यात्मा। अतः लोचनटीकायामभिनवगुप्तेन उक्तम्।

"तेन रस एव वस्तुतः आत्मा। वस्त्वलंकारध्वनौ तु सर्वथा रसं प्रति पर्यवस्येते इति वाच्यात् उत्कृष्टौ तौ इत्याभिप्रायेण ध्वनिः काव्यस्यात्मा इति सामान्येन उक्तम्।" ध्वनिसम्प्रदायानुसारं काव्यं त्रिविधम्।

१. ध्वनिकाव्यम् (उत्तमम्)
२. गुणीभुतकाव्यम् (मध्यमम्)
३. चित्रकाव्यम् (अधमम्)

वाच्यात् प्रतीयमानार्थस्य अतिचमत्कारतया ध्वनिकाव्यं सर्वोत्तमं काव्यम्। वाच्यार्थात् व्यग्यार्थस्य अप्राधान्येन गुणीभुतव्यंग्यकाव्यम् मध्यमकाव्यम्। चित्रकाव्ये शव्दालंकाराणा समावेशेन तथा काव्यप्राणभुतस्य व्यग्यांर्थस्य सत्ताभावात् अधमकाव्यम् भवति।

**वक्रोक्तिसम्प्रदायः**

वक्रोक्तिसम्प्रदायस्य प्रतिष्ठाता आचार्यः कुन्तको भवति। तेन वक्रोक्तिरेव काव्यस्य जीवनमिति उक्त्वा काव्यस्वरुपं निर्णितम्। वक्रोक्तिः शव्दो

संस्कृतवाङ्मये वहुप्राचीनकालात् प्रयुज्यते। वाणभट्टस्य कादम्वर्यां चन्द्रपीड़स्य राजधानीं वर्णनाप्रसङ्गे वक्रोक्तिशव्दो दृश्यते।
"वक्रोक्तिनिपुणेन विलासजने न अत्र राजधान्यां" विलासिजनाः वक्रोक्तिविषये निपुणाः इति उच्यते। कथने अधिकचमत्कारो कथनप्रकार वक्रोक्तिरिति साधारणतया उच्यते। ऐतिहासिकदृष्टया अलङ्कारजगति वक्रोक्तिविषयः भामहेन आलोच्ते। भामहः वक्रोक्तिम् अतिशयोक्तेः नामान्तरं स्वीकरोति। तस्य मते काव्यस्य मूलतत्त्व वक्रोक्तिः अस्ति। तेनोक्तम् :-

सेषासर्वत्र वक्रोक्तिरनयार्थो विभाव्यते।
यत्नोऽस्यां कविना कार्य्यं कोऽलङ्कारोऽनया विना।।

वक्रोक्ति स्वीकारेण भामहः हेतुः सूक्ष्म लेशश्च इति अलङ्करत्रयं नाङ्गीकरोति।
अलाकाराणां कृते वक्रोक्तेः अवस्थानमत्यन्तमावश्यकम्।
वाचा वक्रार्थशव्दोक्तिरलंकारस्य कल्पते। (काव्यालंकारः ५/६६)
अभिनवगुप्तेन भामहोक्तिमुद्धृत्य कथ्यते। शव्दस्य वक्रता, अभिधेयस्य च वक्रतालोकोत्तररुपेण अवस्थापितम्। लोकोत्तररुपेण अवस्थानमेव शव्दार्थयोः वक्रता। लोके शव्दार्थयोः साधारणतया यः व्यवहारः तस्मात् भिन्नः वक्रोक्तिः - यथा – कीर्त्तिशेष इति शव्दस्य अर्थः मृतशव्दः भवति।
आचार्येण दण्डिना वाङ्मयं दिधा विभज्यते। (१) स्वभावोक्तिः (२) वक्रोक्ति। स्वाभावोक्तेः वस्तुनः यथार्थवर्णनं भवति। स्वभावकथनेन भिन्नत्वात् वक्रोक्तेः अतिशयकथनस्य संयोजनं क्रियते। अतः उपमादयः अलंकाराः वक्रोक्तौ अन्तर्भवन्ति। दण्डिनः मतेन श्लेषस्य सत्तया वक्रोक्तिरधिकां श्रियाञ्च लभते। तेनोक्तम् :-

श्लेषः सर्वासु पुष्णाति प्रायो वक्रोक्तिषु श्रियम्।
भिन्नं द्विधा स्वभावोक्तिर्वक्रोक्तिश्चेति वाङ्मयम्।।

अतः दण्डिना वक्रोक्तिः स्वीक्रियतेः या भामहेन प्रतिपादिता। परन्तु भामहमते बक्रोक्तिः सर्वेषामलङ्काराणां मूलम्। वक्रोक्तिः भामहमते सामान्यवार्तालापात् भिन्ना। परन्तु दण्डिनः मते स्वभावोक्तिः वक्रोक्तेः भिन्ना स्वभावक्तौ अतिशयकथनस्य आवश्यकतां नास्ति। वामनेन या वक्रोक्तिः स्वीक्रियते सा भामहप्रोक्तवक्रोक्तेः भिन्ना। आचार्येण वामनेन उक्तम् - सादृश्याल्लक्षणा। वक्रोक्तिः वहुनि हि निवन्धनानि लक्षणयाम्। तत्र सादृश्यात् लक्षणा वक्रोक्तिरसावति। असादृश्य निबन्धना तु लक्षणा न वक्रोक्ति इति।
वामनाचार्यस्य मते वक्रोक्तेः अर्थालङ्कारः सादृस्यमाश्रित्य लक्षणा वक्रोक्तिर्भवति। यद्यपि लक्षणायाः आधारः वहवः ततापि या लक्षणा सादृश्यमधिश्रिता सा वक्रोक्तिः एव बवति। कद्रटस्य समये वक्रोक्तिः शव्दालङ्काररुपेण परिगण्यते। कस्य वक्तुः वाक्यं शृत्वा श्रोता यदि तद भिन्नार्थं न गृहीत्वा भिन्नर्थकमुत्तरं प्रयच्छति तदा वक्रोक्तिरलंकारो भवति।
परन्तु वक्रोक्तिसम्प्रदायस्य प्रतिष्ठाता कुन्तकः वक्रोक्तेः लक्षणं सर्वेभ्यो विलक्षणतया वदति। कस्यापि वस्तुनः स्वरुपं साधारणतया न उक्त्वा अलौकिकरुपेण कथनम् भवति। अनेन भामहवामनादि कृतं वक्रोक्तिलक्षणं खण्डितम्। तस्य मते वक्रोक्तिरेव काव्यस्य जीवनम्। तेन वक्रोक्तिजिवितम् इति ग्रन्थे रचितः। यद्यपि अयं रसध्वानिविषये सम्पूर्णतया परिचित आसित्, तथापि काव्यालोचनायां ध्वनिरसादिसिद्धान्तं न कदापि उक्तम्। अचार्यकुन्तकस्य प्रोढमार्मिक विचारेण बक्रोक्तिः षड़विधः इति प्रतिपादितः -
१. वर्णवक्रता
२. पदपूर्वार्धवक्रता
३. पदोत्तरार्धवक्रता
४. वाक्यवक्रता
५. प्रकरणवक्रता
६. प्रबन्धवक्रता

एताषु षड़विधवक्रोक्तिषु तेन काव्यतत्त्वस्य सर्वे बिषयाः रसः, ध्वनि, अलंकारः, गुणः, रीतिप्रभृतयः अन्तर्भाविताः। अतः तस्यालोचनं व्यापकतया बर्त्तते। ववक्रोक्तिविषये ध्वनिवादिनः आलङ्कारिकाः वक्रोक्तिसिद्वान्तं कुन्तकस्य न स्वीकुर्वन्ति। परन्तु वक्रोक्तेः नैकप्रकारं तैर्ध्वनौ अन्तर्भावयन्ति।
कुन्तकात् परवर्त्तिनः आलङ्कारिकाः अस्य सिद्धान्तं नानुसरन्ति। तथापि आचार्यकुन्तक्रस्य वक्रोक्तिसिद्धान्तं अलङ्कारशास्त्रे मौलिकतत्त्वरुपेण प्रतिष्ठा लभते।

**औचित्यसम्प्रदायः**
औचित्यसम्प्रदायस्य संस्थापकः अचार्यः क्षेमेन्द्रो भवति। सिद्धान्तदृष्टया औचित्यमेव भारतीयालङ्कारसमीक्षाशास्त्रेषु उत्तमोत्तमः सिद्धान्तः। उचितस्य भावः औचित्यम्। अस्य औचितस्य स्रोतः भरतस्य नाट्यशास्त्रात् प्रवहति। नाट्यस्य प्रयोगदृष्टया भरतेन औचित्यं विचारं कृतम्। भरतेनोक्तम् अनुरुपः औचित्यस्य समानात्मकः प्रत्यक्षतया भरतेन लोकधर्मः उचितानुचितयोः नियामकत्वरुपेण स्वीकृतम्। न केवलं रुपदेश चन्दनक्रियासु वहिरङ्गमौचित्यम्। अपितु नाटके पात्राणां शीलगतं मनोवृत्तिगतं अन्तरङ्गे नैतिकं औचित्यं च भरतेन सूचितम्। अनेन च औचित्येन रसास्वादः पूर्णतां प्राप्नोति।
भरतादनन्तरं दण्डीभामहादयः यद्यपि प्रत्यक्षरुपेण औचित्यं न विवोचितवन्तः; परन्तु काव्ये दोषरुपेण अनौचित्यं परिहर्त्तुमिच्छन्ति। अतः एकेनापि दृष्टपदप्रयोगेण काव्यस्य अनुत्कर्षः। अतः दण्डी भामहकृत दोषपरिहारविवेकः औचित्येन सह परम्परया सम्बन्धः।
भट्टलोल्लटस्य मते शास्त्रीयपरिवेशे रसस्य औचित्य अलंकारस्य औचित्यम् वृत्तीनाम् औचित्यं निरुपणीयम्।
आनन्दवर्धनाचार्येण विशदतया निरुपणं कृतम्। तन्मते कवेः प्रतिभाएव औचितस्य निरुपणेमूलकारणम्। आनन्दवर्धनेन औचित्यविषये कथ्यते; विभावानुभावव्यभिचारिभावानां औचित्यानुसारं संयोजनं अवश्यमेव करणीयम्। न केवलं शास्त्रीयविधानानुसारेण अपितु रसाभिव्याक्तिः प्रति गुरुत्वं प्रदाय कविना निवन्धः कार्यः ध्वन्यालोकस्य टीकाकरिणा अभिनवगुप्तेन औचित्यं रसानुकुलं इति प्रतिपादितम्।
कुन्तेकेन वक्रोक्तिसिद्धान्तं वक्रतायाः औचित्यं सन्निवैशितम्। षडविधेषु वक्रताप्रकारेषु औचित्यमेव प्राणाः, महिमभट्टेनापि काव्यस्य आत्मा रसरिति स्वीकृतः यथाः-

अनौचित्या दृतनान्यत् रसभङ्गस्य कारणम्।
प्रसिद्धौचित्य वन्धस्तु रसस्योपनिषत्परा।।

वस्तुतः आचार्येग क्षेमेन्द्रेण औचित्यं संस्थाप्य औचित्यस्य लक्षणं कृतम् यत्:-

औचित्यं प्राहुराचार्याः सदृशं किं लक्षस्य वत्।
औचित्यस्य तदाभावो तदौचित्यं प्रचक्षते।।

उचितशव्दे ष्यङ् प्रत्ययेन औचित्यपदं निष्पन्नम्। औचित्यमेव रसस्य प्राणस्वरुपम्। यो रसः काव्यस्यात्मा अलंकारास्त्वलंङ्कराः गुणाः एव गुणाः मताः औचित्यं रससिद्धान्तस्य स्थीरं काव्यस्य जीवितम् इति क्षेमेन्द्रेण उक्तम्।
काव्यस्य आत्मभुतस्य रसस्य जिवितुं तु औचित्यमेव। भरतादीन् आचार्या मनुसृत्य क्षेमेन्द्रण उक्तम् :-

उचित स्थान विन्यासः अलंकृतिरलंकृतिः।
औचित्यात् उचितं नित्यं भवन्ति।।
क्षेमेन्द्रेण अष्टविंशतिः प्रकाराणि औचित्यानि निर्दिष्टानि। यथा :- पदवाक्य, अर्थः

प्रवन्ध गुणालंकारस क्रियाकारकंलिङ्गवचन विशेषण उपसर्गनिपात अभिप्राय काल देशदुकुल व्रत स्वभाव प्रतिभा-
विचारनाम् आशीर्वाद इत्यादि।
क्षेमेन्द्रादनन्तरं बेणीसंहारनाटकस्य कर्त्रा भट्टनारायणेन चरित्रगतौचित्यमपि प्रतिपादितम्। सरस्वतीकण्ठाभरणे भोजराजेन औचित्यस्य काव्ये सन्निवेशः कर्त्तव्यः इति उक्तः। परन्तु विश्वनाथकविराजः पन्डितराजजगन्नाथश्च औंचित्यं न स्वीकरोति। औचित्याविरहेण रसभङ्गः भवति इति स्वीकृतः।

## निष्कर्ष

अलंकारसंप्रदाये यद्यपि रसादयः षडसम्प्रदायाः स्व - स्वस्थाने उत्तमरुपेण विराजन्ते। तथापि सर्वेषु संप्रदायेषु रसस्य माहात्म्यं सर्वाग्रे वर्त्तते। वस्तुतः रसस्य आशयः सर्वेषु सम्प्रदायेषु परीलक्षितो भवति। भरतमुनिःरससंप्रदायस्य स्रष्टा रुपेण विख्यातो भवति। तथापि तेन अलंकारादीनां रात्माकाव्यमहत्वं नाङ्गीक्रियते इति न। तथैव भामहः यद्यपि अलङ्काराणां प्राधान्यं काव्ये अनुभूयते। परन्तु श्लेशाद्यलंकारस्य श्रेष्ठतां स्वीकोरति।ध्वनिकार आनन्दवर्धनः ध्वनितत्वं स्वीकरोति। तत्र ध्वनिकाव्येषु रसध्वनिरेव उत्तमकाव्यत्वेन व्यपदिश्यते । वामनाचार्येण रीतिस्य, कुन्तकेन वक्रोक्ति काव्यजीवितं, क्षेमेन्द्रेण च औचित्यम् स्वीकृत्य स्व - स्वसम्प्रदायमङ्गिकृताः। परन्तु सर्वेषु सम्प्रदायेषु प्रायतः रसस्य प्राधान्यं न्युनाधिक्येन दृश्यते।

## सहायकिग्रन्थसूची

1. अलंकारशास्त्रेतिहासः prof.Ketaki Mishra sambidprashan Puri Odisha.
2. History of poetics, P.V. Kane, Motilal Banarasidas.
3. संस्कृतसाहित्यस्य इतिहासः, Dr. Harekrushna Satpathy
4. संस्कृतसाहित्यस्य इतिहासः, बलदेव उपाध्यायः, चौखम्बाप्रकाशनम्।
5. History of Sanskrit poetics, S.K.De, Motilal Banarasidas.